Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

3·S
VI

नवरूपकम्

(प्रथमः प्रकाशः)

लेखकः

डा० गुल्लपल्लि श्रीरामकृष्णमूर्तिः

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

स्कैन्ड/Scanned

Digitized by Arya Samaj Foundation Chennai and eGangotri

3. संस्थ

यदि

कार्य

4. लेखक

(क)

(ख)

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

नवरूपकम्

(प्रथमः प्रकाशः)

170

2

महर्षि-पाणिनि-प्रज्ञा-अनुसन्धान केन्द्र
तिथी.........
पु०सं०.........
भारती पुस्तकालय

1459
1459

लेखक :

डा० गुल्लपल्लि श्रीरामकृष्णमूर्तिः

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

NAVARUPAKM

PART - I

BY

DR. G. S. R. KRISHNA MURTY,

LECTURER,

KENDRIYA SANSKRIT VIDYAPEETH,
LUCKNOW – 226 020.

© RESERVED

PUBLISHERS :– V. R. PRAKASHAN

CONVENOR – DR. S. N. PANDEY

Price :– Rs. 30/–

SANSKRIT–DAY, 1992
श्रावणी पूर्णिमा, आंगीरसः

COMPOSED BY :–

LASER GRAPHIX
312, Prince Complex,
Hazratganj, Lucknow–1.

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

190

ॐ

महर्षि-पाणिनि-प्रज्ञा-अनुसन्धान केन्द्र
तिथी.........
पु०सं०.........
भारती पुस्तकालय
1459

प्रपत्तिः –

आङगिकं भुवनं यस्य वाचिकं सर्ववाङ्मयम् ।
आहार्यं सूर्यचन्द्रादि तं वन्दे सात्त्विकं शिवम् ।।१।।

प्रणम्य नटराजं तं पितरौ गुरुदैवतम्।
विनूत्नं नवसंख्याकं कुर्वेऽहं नवरूपकम्।।२।।

प्रवृत्तिः –

"सर्वथा व्यवहर्त्तव्यं कुतो ह्यवचनीयता।"
इति भवभूतिसूक्तिं स्मारं स्मारं यथामति।।३।।

सांप्रतं भारतं नाट्यमुत्सूत्रं च विशृङ्खलम्।
दर्शं दर्शं प्रवर्तेऽहं कविकीर्तिप्रलिप्सया।।४।।

निवित्तिः –

रूपकाणां संग्रहेऽस्मिन्नाध्रीतश्च द्वयं तथा।
स्वकीयं रचितं पट्कं प्रत्नादेकं सुसंस्कृतम्।।५।।

"गुणदोषज्ञसान्निध्ये दोषाणां हि निवेदनम्"।
इति साध्वसमात्मीयमतीतं बुधसेवया।।६।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

वरविक्रयम्

भूमिकाः

1.	रामशर्मा–	किरणस्य पिता
2.	कामेशः –	रामशर्मणः मित्रम्
3.	षण्मुखः –	रामशर्मणः अन्यन्मित्रम्
4.	सच्चिदानन्दः–	नवपरिणीतः किरणस्य मित्रम्
5.	परात्परः –	किरणस्य विवहार्थम् आगतः कन्य

प्रहसनमिदं छात्रावस्थायां 1983 तमे वर्षे तिरुपति – केन्द्रीय – विद्यापीठे प्रदर्शितम् ।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

महर्षि पाणिनि ... अनुसन्धान
तिथी..........
पु०सं०.........
भारती पुस्तकालय
1459

श्रीः

वरविक्रयम्

प्रथमं दृश्यम्

(स्थलम् – रामशर्मणो गृहम् ।)

रामशर्मा :– *(पुराणं पठन्)* दत्त्वा कन्यां विधानेन मुनिदेवेन्द्रसंसदि।
गजेन्द्राणां त्रिलक्षं च जामात्रे यौतुकं ददौ।।

अहो कीदृशी कथा आगता अद्य। यौतुकं पुरातनकालादपि अनुस्यूततया आगच्छति। अद्यतनाः युवकाः किमपि न जानन्ति। ब्रह्मवैवर्तपुराणे स्पष्टमस्ति– "जामात्रे यौतुकं ददौ" इति। को वा ब्रूयात् यौतुकं धर्मशास्त्रेषु निषिद्धमिति। निषिद्धं चेत् पुराणेषु कथं भवेत् ? अन्यच्च कीदृशं यौतुकम्? अधुनेव न कर्गजपत्राणि। मणयः, स्वर्णं च। *(लेखवाहः (Postman) आगत्य post इति पत्रं ददाति)* रामायणे प्रेमायणमिव पुराणपारायणे Post इत्यादि, अध्यात्मचिन्तनस्य बहवो विघ्नाः, भवतु, अतएव वदन्ति श्रेयांसि बहुविघ्नानीति। *(पत्रं पठन्)* विशाखपत्तनम्, अरे पुत्ररत्नस्य सकाशात्, सर्वदा अयमेकं वा पदं पदद्वयं वा लिखति। बाल्ये मयोपदिष्टः व्याकरणसंप्रदायः अस्य मस्तिष्के जीर्णः अभूत् । शास्त्रानुप्रयोगो नाम तथा भवितव्यः। *(पठन्)* "सर्वं कुशलम् धनमपेक्षितम्" अरे ! अस्य विद्यायै यावदपि धनं न पर्याप्तं भवति। अस्य एम्.बी.बी.एस् . विद्यायै द्विलक्षमभूत् सप्ताहात्पूर्वं पञ्चशतरुप्यकाणि प्रेपितानि, अधुना धनमावश्यकं किल। किमत्र धनं वृक्षाः फलन्ति वा? अनेन किमपि न ज्ञायते। कथं वा करणीयं कुटुम्बभरणम् ? पुस्तकं पुण्यं वा कथं मस्तिष्के आयाति। *(आलोचयन्)* आं..... महाभारते पृथुचरिते पृथोः दौष्टयं विवाहेन शान्तमिति पठितम् । विवाहे यदि जाते कर्तव्यदायित्वानि मनसि आयान्ति। भवतु, विवाहं कारयामि। अधुना धनं कुसीदाय दत्तम्,

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्चिद्धनमपि आगमिष्यति। अथ कामेशः "कन्यकां दास्यामीति व मूढः। आं..... किं दास्यति यौतुकम् ? अत एव निर्लज्जमुक्तं मया "त संवन्धः मास्तु" इति। यौतुकं पञ्चविंशतिसहस्त्ररूप्यकाणि किल। क आवश्यकानि ? मम पुत्रः एम्. बी.बी. एस् पठति। त्रिलक्षरूप्यक स्वीकुर्याम्।

कामेशः- (*प्रविश्य*) भोः ! किं समालोचयन्ति ? त्रिलक्षरुप्यकाणि किमर्थम् ? नूतनगृहं निर्मान्ति ?

रा :- नूतनं गृहं किमर्थम् ? अस्मत्पुत्रः तव पुत्रिकां उद्वक्ष्यति इति वा।

का :- (*ससंभ्रमम्*) आं... गृहं सम्यक् नास्ति। उपरितलं सर्वं छिद्रप्रायं कि सदा सूर्याचन्द्रमसौ गृह एव राज्यं कुरुतः।

राः- किं परिहासः ? तव पुत्रस्य यौतुकेन निर्मिते गृहे प्रकोष्ठे विधुर इव क क्षिपसि। त्वं वा मां परिहससि ?

काः- भोः! किमर्थं कलहः श्रेयोभिलाषी वदामि। मम पुत्रीं न विवाहयिष्यन्त न। सत्यं वदामि। सप्ताहात्पूर्वममलापुरात् कश्चन प्राड्विवाकः भवत्पु कन्यां प्रदातुमागत्य गृहं दृष्ट्वा पर्णशाले कथं वत्स्यति मे पुत्रिवे प्रतिनिवृत्तः। मया "भोः ! रामशर्मणां निकटे बहु धनं विद्यते, तैश्चिन्त चेत् क्षणद्वये बृहद्भवनं निर्मातुं शक्यते" इति बहुधा अनुनीतोऽ पलायितवान्।

राः- किं तथा वक्षि ? अहं प्रगतप्राच्यकलाशालाप्राचार्यः, बहुग्रन्थपरिष्क आदर्शोपाध्यायविरुदाञ्चितः। मामेवं वक्षि? अस्मादृशाः यत्र निवस तदैव स्वर्गम् । कृष्णस्य व्रज एव वैकुण्ठ आसीत्। ब्रह्मा, इन्द्रः सर्वे दे तत्रैव आगत्य तं स्तुतवन्तः।

का :- भवतु भोः। गृहं भवतां स्वर्गमेव। भाविन्याः स्नुषायास्तु रौरव इव भाया

रा :- (*सक्रोधम्*) आँ .... मम जन्म अस्मिन्नेव प्रकोष्ठे आसीत् । मम, मम पि मम पितामहस्य, मम प्रपितामहस्य च इदमेव अरिष्टम् ।

का :- अत एव वच्मि, सर्वेषामिदं गृहमरिष्टमिति।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रा :- अस्तु तर्हि किमर्थं मया नूतनं गृहं निर्मातव्यम् ? मम पुत्रः अत्रैव उदभूत्। ज्यौतिषिका अवोचन्, गृहमिदं जयकरमिति।

का :- सर्वदाऽजयमेव। यः कोऽपि कन्यादाता आगत्य गृहं दृष्ट्वा पलायते। येन केनापि उक्तं किल, भवतां गृहं पिशाचाविष्टमिति।

रा :- (*सरोषम्*) सर्वदा अग्निहोत्रं कुर्याम्। किमिदं पिशाचगृहम् ? मम प्राणधारणं यावत् नूतनगृहप्रसङ्ग एव नास्ति।

का :- तव श्रेयोऽभिलाषी वदामि, यदि श्रूयते चेत् साधु, नो यदि किमर्थम् ? नास्माभिः वक्तव्यम्। ह्यः रात्रावपि मया दृष्टाः पिशाचाः भवतां गृहोपरि नृत्यन्तः। भवतां निद्रा नासीत् किल। सर्वमहं जानामि। भवतु तन्मम किमर्थम् ? कथमसूययन्ति मम पुत्राय, लक्षरूप्यकाणि यौतुकमागतमिति। भवतां कोपं, गृहस्य पिशाचाविष्टत्वं च श्रुत्वा को वा आयाति कन्यकां प्रदातुम् ? मम पुत्रः भवतां किरणश्च समवयस्कौ। मम पुत्रस्य द्वौ पुत्रौ। भवतां पुत्रस्य विलम्बे विवाहस्य कारणं जानासि वा ?

रा :- सत्यम् । सत्यं रे। यः कोऽपि न आयाति कन्यकां प्रदातुम् । मम पुत्रस्य विवाहार्थं वत्सरत्रयात् पश्यामि, यः कोऽपि नायाति त्वां विना। किं त्वमेव वा गृहं निर्मातुं समर्थः? अहमपि निर्मास्यामि।

षण्मुख :- (*प्रविश्य*) किं भोः, किं निर्मास्यन्ति ?

का :- रामशर्मणः कुमारस्य विवाहात्पूर्वं गृहनिर्माणम्।

ष :- सम्यगस्ति। विवाहकरणं गृहनिर्माणं च एकदैव। समस्तपुराणपारायण - फलमेतत्। अदृष्टं नाम तथा भवेत्।

रा :- (*सगर्वम्*) किं मन्यसे ? मासद्वये गृहं निर्मास्यामि। तद्धनं कुमारस्य यौतुकात् संपादयिष्यामि। तथा भवितव्यं प्रज्ञया। कथमस्ति मे धिषणा ?

ष :- तर्हि मुहूर्तो निर्णीयताम् ।

का :- मुहूर्तः किमर्थम् ? पराशरस्मृतौ "न तीथिर्न च नक्षत्रं कुर्वीत बुधसोमयोः" इति स्पष्टमुल्लिखितम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प :- तर्हि क्रियताम्। आगामिनि चतुर्थी-दिवसे सम्यगस्ति।

का :- एवं चेत्रापितमाह्वय।

रा :- नापितः... नापितः किमर्थम् ?

प :- न न, वाक् स्खलिता। शान्तं पापम् । स्थपतिमाह्वय।

रा :- धनमुहूर्तो भवेत् । मम धनममेयमायातव्यम् ।

प :- तस्यां तिथौ जयवासरः भरणीनक्षत्रम् । समीचीनमस्ति। भवतां जन्मता चन्द्रः धनराश्यधिपतिं वीक्षते।

का :- सर्वधा समीचीनो मुहर्तः। गृहनिर्माणाय योजना आवश्यकी ।

प :- परह्यः पुरपालकसंघाधिकारिणः आगत्य अस्माकमग्रहार अमलापुरपरिवर्धनाय युक्ततरमिति लिखित्वा गतवन्तः।

का :- तदानीमापणाः वित्तकोशाः कलाशालाः अत्रापि निर्मास्यन्ते।

रा :- तर्हि अस्मद्गृहा अपि भाटकाय दातुं शक्येरन्। तर्हि बृहद्गृहं निर्मेयम्

का :- साधु साधु। वहुप्रकोष्ठियुतं भाटकार्हं गृहं निर्मेयम् ।

प :- नहि गृहम्, प्रासादः निर्मेयः। किरणः एम्.बी.बी.एस. परिप् आगच्छति चेत् चिकित्सालयस्य कृतेऽप्युपयोक्ष्यते।

रा :- सम्यगूहितम् ।

प :- वयं मित्राणि किमर्थम् ? वचस्सहायार्थम् एव खलु। बाढम्। गृहकर्म व चालनीयम् ।

रा :- Contract दास्यामः।

का :- Contract चेत् वित्तलोलुपतया सिकतयैव निर्मीयन्ते। अ दिनपत्रिकायां दृष्टम्, विशाखपत्तने नूतनं गृहं भग्नमिति।

प :- रामशर्माणः ! यद्यस्माभिः गृहं निर्मीयते, शाश्वतं वंशपारंपर्यं या स्थातव्यम्। धनव्यय इति मा गणयत। यद्यावश्यकमहं दास्यामि धनम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

रा :- अधुना आवश्यकं नास्ति। यदापेक्ष्यते कर्णोऽपि दास्यति खलु।

Digitized by Arya Samaj Foundation Chennai and eGangotri

का :- अवश्यम् । तत्र किमस्ति ? परस्परादानप्रदानाभ्यां खलु स्नेहः वर्धते।

ष :- तर्हि, गृहकर्म अस्माभिरेव प्रतिक्षणं निरीक्षणीयम् । स्थपतयः यदि परकीयाः, सदा निरीक्षणे क्रुद्धा भविष्यन्ति। अतः मम ग्रामे स्थपतिरेकः प्रसिद्धः अस्ति। तं नियोजयामि।

रा :- कियद्दातव्यम् ?

का :- सर्वं तत्, वयं द्रक्ष्यामः। तव किमर्थम् ? तव नष्टं किमपि न भविष्यति।

ष :- अधिकं न दातव्यम् । मम ग्रामे शास्त्रिणां गृहं निर्मितम् । तैः प्रतिदिनं द्विवारं भोजनं पञ्चरुप्यकं च दत्तम् । मासद्वये भवनं सेत्स्यति। नवममासे पुत्रस्य विवाहः। कथमस्ति ?

रा :- समीचीनमस्ति। सुहृदसाध्यं नाम किमस्ति लोके। सायं सन्ध्यार्थं गच्छेम।

(इति अन्तः गच्छति उभावपि स्वगृहं गच्छतः)

द्वितीयं दृश्यम्

(स्थलम् – श्रीरामपुराग्रहारे रथ्यायां रामशर्मा घटेन जलमानयति)

नेपथ्ये – रामशर्मणां गृहं कुत्र ?

रा :- कः प्रातः मम गृहम् अन्विष्यति ? अहमत्र दक्षारामभीम इव पुरस्तिष्ठामि नाहं दृष्टो वा तेन ? कीदृशः कालः समागतः प्रतिभावतां नायं समयः।

परात्परः- (*रामशर्मणः पुरतः आगत्य*) अयि, रामशर्मणां गृहं कुत्र ?

रा :- पुनरयमेव प्रश्नः। मामेव पृच्छसि।

परा :- त्वामेव। वद। किं संभ्रान्तस्तिष्ठसि ?

रा :- किं वदसि ? मामेव वा। प्रगतप्राच्यकलाशालाप्राचार्यं तार्किक – दिग्दन्तिमदहारकं श्रीरामपुराग्रहारचूडामणिं मां "रामशर्मणां गृहं कुत्र ?"

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति पृच्छसि। तव को ग्रामः ? महापुरुषाणां पुरतः कथं स्थातव्यमि
जानासि, किं करोषि ? अहमेव रामशर्मा।

परा :- (*साश्चर्यम्*) भवन्तो वा रामशर्माणः। क्षम्यताम्। कोऽपि वारिव
घटमानयतीति भ्रान्तं भोः। क्षम्यताम्।

रा :- किमहं वारिवाहको वा ? कीदृशमवहेलनम् ? प्रतिदिनं प्रातः स
शुचिर्भूत्वा कुल्याया जलमानीय देवतार्चनं कार्यमिति अ
पितृपितामहादीनामाचारः।

परा :- अवश्यं पितुराचारः। अत एव आगतोऽहं भवतां कृते। बहुदूरादागतोऽ

रा :- तत् गृहप्रश्नादेव अवगच्छामि। किमर्थम् ?

प :- भवद्भिः किञ्चित् कार्यमस्ति।

रा :- कार्यं विना कथमागच्छसि ? किं कार्यमिति पृच्छामि।

प :- अस्मद्ग्रामः मन्दपल्ली।

रा :- तर्हि किं कार्यम् ?

प :- ममैका कन्या अस्ति भोः। तस्याः विवाहः करणीयः।

रा :- किं धनमावश्यकं ? मम सकाशे नास्ति।

प :- तदर्थं न भोः। भवतां पुत्रः एम्.बी.बी.एस. पठतीति, तस्य वि
चिकीर्षन्तीति आगतोऽहम्।

रा :- त्वं वा मम पुत्राय कन्यां प्रदातुम् ?

कामेशः :- (*प्रविश्य*) अये शर्माणः। एते मन्दपल्ल्यग्रहारभूस्वामिनः। किं
परिहरन्ति ? (परात्परं प्रति) अयिः एते अग्रकोपाः, एषां मनः अ
मृदुलम्। आयान्तु।

रा :- एतन्मम नैजम्। मान्यथा संभावयन्तु। अस्माकं गृहमायान्तु। अधु
गृहनिर्माणं करोमि। अत्रैव आवासः। पर्णशालायामुपविशाम।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प :- अस्तु। अत्रैव उपविशामः। (*उपविशन्ति*)

का :- कन्या किं करोति भोः ?

प :- बी.ए. उत्तीर्णा। गृहे एव तिष्ठति भोः। विश्वविद्यालयं बहुदूरमिति नैव प्रेषिता।

का :- भवतां सदाचारमहं जानामि।

रा :- संगीतं किमपि जानाति ?

परा :- एवं भोः। संगीतं सम्यग्जानाति। वीणावादनमपि शिक्षति।

का :- किमपि गृहकर्म जानाति ?

परा :- सम्यक् भोः। सदा तस्या एव स्वाम्यं गृहे।

रा :- किमपि पुराणपरिचयः वर्तते ?

का :- अधुनातनाः कन्यकाः पुराणानि कथं जानन्ति ?

प :- बाल्ये अमरकोशं, शब्दमन्जरीं, रुक्मिणीकल्याणमध्यापयम्। किन्तु अधुना विस्मृतं स्यात्।

रा :- (*स्वगतम्*) संबन्धस्समीचीन इव भाति। कियद्वा धनं दास्यति ? (*प्रकाशम्*) कति पुत्राः ?

प :- द्वौ पुत्रौ। तिस्रः कन्यकाः।

का :- कतमेयम् ?

प :- इयं तृतीया।

का :- (*जनान्तिकम्*) अयं संबन्धः सम्यगस्ति। भवते रोचते चेत् शुभस्य शीघ्रम्। नूतनगृहप्रवेशेन सह वधूप्रवेशोऽपि। मुहूर्तबलं सम्यगस्ति। परात्परमहोदयान् बाल्यादहं जानामि। संपन्नाः। यौतुकं सम्यगेव दास्यन्ति। अंगीक्रियताम्।

परा :- यथाशक्ति दास्यामि यौतुकम्। इतः पूर्वं द्वौ विवाहावपि विना कोलाहलं कलहं वा कृतवान् भोः।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रा :- तदेव पृच्छामि, कियत् स्यादिति।

प :- मम ज्येष्ठयोः यथा दत्तम् तथैव दास्यामि।

रा :- समयः विपर्यस्तः। मम बाल्ये कन्याशुल्कम् । अधुना कन्यकायै को दास्यति धनम् ? मम पुत्रस्य उपनयनसमये धान्यानि सर्वाण अल्पमूल्यानि। ते दिवसा एव गताः। तथा न वक्तव्यम्। आहारव्यवहा त्यक्तलज्जस्सुखी भवेत् । वदन्तु। मया सह विवाहसंबन्धः भ भाग्यायैव। मे भवनं त्रिलक्षरूप्यकं मूल्यं भवति। मे पुत्रस्य म कण्ठहाराः, मणिहाराः, मुक्ताहाराः बहूनि आभरणजातानि सव पुत्रायैव। एकं रुप्यकमपि नेतुं कन्यापि नास्ति।

का :- एतेषां Pension अपि आगमिष्यति।

प :- अत एव खलु भोः अहमागतवान् । एते शास्त्रपण्डिताः बहुकुशलिनः। मम भाग्यम् !

का :- उच्यतां भोः। जामाता वैद्यः। सोऽपि बहुधनं संपादयिष्यति।

प :- (*दीर्घं विचिन्त्य*) भवतु एकलक्षं दास्यामि।

रा :- लक्षरुप्यकाणि कस्य आवश्यकानि ? अस्मत्कामेश दास्यामीत्युक्तवान्। तत्रैव खलु मतभेदः।

का :- (*जनान्तिकं*) लक्ष्यरुप्रुकाणि दातुमंगीकुर्वतां सार्धलक्षदाने कः क्लेशः

प :- अहो ! तावत् न दद्याम् । ममापि पुत्रौ पाठनीयौ स्तः।

का :- अयं संबन्धः गच्छेत् । साहसे लक्ष्मीरिति वदन्ति।

प :- (*प्रकाशम्*) सपादलक्षरुप्यकाणि दास्यामि।

रा :- नाहमंगीकुर्याम् ।

का :- (*जनान्तिकम्*) अयि शर्मन् ! भवनं निर्माणे विद्यते। मम सविधेऽपि नास्ति। यौतुकम् आगमिष्यति खलु। पूर्वं स्वीकुर्मः। अनन्तरं शक्यते। उररीक्रियताम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रा :- सत्यम्! सत्यम् (*प्रकाशं*) अस्माकं कामेशस्य वाक्यम् अङ्गीकरोमि।

प :- धन्योऽस्मि भोः। कदा आगमिष्यन्ति कन्यकां द्रष्टुम् ?

का :- सिद्धान्तिनम् उक्त्वा आगमिष्यन्ति।

रा :- विलम्बादमृतं विषम् इति वदन्ति। आगामिनि गुरुवासरे आगच्छाव।

प :- वत्सायापि पत्रं लिखन्तु।

रा :- स किं जानाति ? प्रथमत आवामागच्छाव।

का :- एषां पुत्रः विनयाग्रणीः। पितृवाक्यपालने साक्षाद्रघुराम एव।

प :- पुत्रः तथा स्यात् । शिक्षणं नाम तथा भवितव्यम् । कीदृशो विनयः ? अवश्यमागच्छताम् । भोः कामेशाः भवन्तोऽपि आगच्छन्तु।

रा :- शिवपूजायां भल्लूक इव अयं किमर्थम् प्रयाणव्ययाय ? अपि च, न गच्छेद् ब्राह्मणत्रयमिति वदन्ति। अवश्यमावां दम्पती आगच्छाव। (*जवनिका पतति*)

तृतीयं दृश्यम्

(स्थलम्) रामशर्मणः गृहप्राङ्गणम्)

रा :- (*कण्डोलहस्तः प्रविश्य*) अयं षण्मुखः सर्वधा मां नाशितवान् । प्रतिदिनं दिनवेतनाय कारूणां भोजनाय च मम धनं व्ययितम् । कर्मकराणाम् अन्नादिकमपि मयैव पचनीयम् । ममगृहिणी प्रतिदिनं शपति। संवत्सरं यावत् क्रीतानि सूपादीनि तण्डुलादीनि सर्वाण्यपि पूर्णं गतानि। यौतृकार्थं प्रासादः निर्मेयः इति कामेशः उक्तवान् । तस्य वचांसि विश्वस्य निर्माणरतस्य मम स्थपतिरपि युक्ततरो लब्धः। किमपि कर्म न करोति। अत एव तं कार्यात् निष्कास्य अहमेव कर्म करोमि। किं कर्तव्यम् ? प्रारब्धमुत्तमगुणा न परित्यजन्ति खलु। अस्तु। अस्य षणमुखस्य युक्ततरः प्रतीकारः कर्तव्यः। सोऽपि पुत्रस्य यौतुकं विवाहे वेश्यानर्तनादीनां कृते विनियुज्य शिष्टेन धनेन जीवति। भवतु। अवश्यमागमिष्यत्यवकाशः।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

सच्चिदानन्दः :-
Digitized by Arya Samaj Foundation Chennai and eGangotri

(*प्रविश्य*) अब्रह्मण्यम्। हा धिक् जीवनम् ।

रा :- किमरे ! किं संजातम् ।

स :- किं संजातं वा। मम विवाहबन्धः उद्बन्धनरज्जुबन्ध स्सज्जातः।

रा :- अरे यौतुकममेयं स्वीकृतं खलु।

स :- यौतुकस्वीकारेण मम को वा लाभः ? तन्मम पित्रैव स्वीकृतम्।

रा :- "अपुत्रस्य गतिर्नास्ति" इति सूक्तस्य कोवा अर्थः ? एतादृशं धनार्ज खलु।

स :- तद्वा। अहो ! कीदृशं भाष्यं कृतम् ? अहं बाल्यादपि विभेमि विवाह तथैव मम गृहिणी अपि मां पीडयति। अत एवोक्तम् आंग्लेयैः "Wife knief to cut your life" इति।

रा :- तत् मन्थरा-सदृशस्त्रीणां विषये। अरुन्धतीतुल्या तव भार्या किं कृतवत

स :- सा न किमपि करोति। प्रतिदिनं वर्धते खलु कुटुम्बः।

रा :- तदर्थमेव रे विवाहः। कालिदासः किमुक्तवान् "प्रजायै गृहमेधिन इति।

स :- एतादृशानि वचनानि श्रुत्वैव मम अमूल्यं ब्रह्मचर्यं नष्टम्। अहो की ब्रह्मयचर्यम् ! एकः आंग्लकविः उक्तवन्" "Bachelor is peacock betrothed is a lion and wedden is an as

रा :- तत्रैव अस्ति सामाञ्जस्यम् ।

स :- किं सामाञ्जस्यम् ? प्रतिदिनं क्षीरानयनाय मम हस्तपादं बाधायुतं भव अयं ग्रामोऽपि क्षीरं सर्वं क्षीरकेन्द्राय प्रेषयति। अतः किमपि न लभ्य क्षीरं नानयेयं यदि गृहे कलहः, यद्यानयेयं नीरसंकीर्णमिति। सदा कोला एव। अत एव वदति कश्चन "A man's best fortune or h worst is his wife", शालीनता नास्ति खलु।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रा :- (स्वगतम्) भवतु अस्य [illegible] पण्मुखेन एकां गां क्रापयामि। पण्मुखोऽपि इतएव आयाति।

पण्मुखः :- (आगत्य) अरे सच्चिदानन्द ! किं प्रातरेव कोलाहलं करोषि ?

रा :- अस्य एका समस्या आगता। सा त्वया समाधातुं शक्यते किम् ?

प :- यदि शक्यते अवश्यं करवाणि।

रा :- अनेन ग्रामेऽस्मिन् क्षीरं न लभ्यते किल, तत्त्वया दातुं शक्यते वा ?

प :- किमस्माकं गावस्सन्ति ?

रा :- न सन्ति चेत् क्रीयन्ताम् ।

प :- धनं कुत्र विद्यते ?

रा :- पुत्रस्य विवाहे यौतुकं स्वीकृतं खलु।

प :- पुत्रस्य विवाहार्थं व्ययितम् । किं त्वं न जानासि ?

रा :- आँ, किञ्चिदपि शिष्टं भवति। गोः क्रयणाय कियद्धनमपेक्षितम् ? जर्सीजातिगौश्चेत् चतुस्सहस्त्रम्।

स :- जर्सीजातिगौः सम्यक् क्षीरं ददाति। सायं प्रातः द्व्याढ़कं चतुराढ़कं वा दास्यति।

रा :- तथा सति, शिष्टं क्षीरमन्येभ्योऽपि दातुं शक्यते।

स :- सत्यम् । अवश्यं प्रतिदिनं विंशतिरुप्यकाणि विना श्रममायान्ति। धनस्य वित्तकोशमध्ये क्षेपणे को लाभः ?

प :- उपायः सम्यगस्ति। किंतु मम पुत्रः किं वा वक्ष्यति, इत्यालोच्य क्रेष्यामि।

रा :- अत्रापि पुत्रैस्सह समालोचना ? किं मन्त्राङ्गम् ? पश्य। मम प्रासादं प्रति गृहण्या अपि समालोचना नैव कृता। गजक्रयणमिव किमूर्ध्वमधः पश्यसि?

स :- अहमेव क्रेष्यामि। छिद्रघटे नीरमिव मासिकवेतनं सर्वं कुटुम्बपोपणार्थमेव व्यपगच्छति। Ever filling never full इति वदन्ति।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रा :- अहमेव क्रेतुं वाञ्छामि। अस्मिन् प्रासादनिर्माणे बद्धोऽस्मि। कदा प्रारब्धम् ?

स :- (*षण्मुखं प्रति*) भवद्भिः क्रीयताम्, यदि धनमपेक्षते साहाय्यं कुर्मः।

ष :- अस्तु यथाकथञ्चित् क्रेष्यामि।

रा :- तर्हि तृणादिकं क्रेयम्। समयः व्यतीतश्चेत् तृणं न लभ्येत। अद्यैव राम भूस्वामिपुरुषाः त्रणं विक्रेतुमागताः।

ष :- गौः न क्रीता खलु। प्रथमतः तृणजातं किमर्थम् ?

रा :- त्वं किमपि न जानासि। गौः क्रीता चेत् केशान् चारयिष्यसि किम् (*सच्चिदानंद प्रति*) अरे ! गच्छ शीघ्रं, तान् पुरुषानाह्वय।

सः- सत्यं सत्यम्। तथैव (*इति निष्क्राम्यति, जवनिका पतति*)

चतुर्थं दृश्यम्

(स्थलम् :- रथ्या। षण्मुखः गां चालयन् आयाति)

ष :- अहो कीदृशं नष्टं संप्राप्तं मे। एतौ न मित्रे। कीदृशं वञ्चनम्। प्रथमतः ग्रासः क्रापितः। सः वर्षजलात् शीर्णो भवतीति गोः क्रयणम्।

स :- (*प्रविश्य*) किं भोः ? गौः कदा प्रसविष्यति ? प्रथमत एव क्षीरं प्रति दास्यामीति धनम् अग्रिमरुपेण स्वीकृतम्।

ष :- किं कार्यं रे। दिनत्रयात्पूर्वं गौः प्रसूता। वत्सं प्रसूतवती।

स :- तर्हि कुतो न भणितम् ?

ष :- किं वक्तव्यं रे ! प्रथमदिवसे क्षीरमधुक्षम्। तदानीम् अर्धखारीपरिमितं दत्तवती।

स :- जर्सी गौः खलु। अर्धखारीपरिमितं कथम् ? अहो ! अस्मभ्यं दातव्यां एवमसत्यं भणन्ति। इतः पूर्वमेव खलु क्षीरपात्रं बृहत् क्रीतवन्तः ?

ष :- क्रीतं रे ! इतरदेशोत्पन्नेति यन्त्रोऽपि क्रीतः। किमपि फलं नास्ति।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्र :– एकवारं पशुचिकित्सालयं दर्शनीया।

त्र :– दर्शयित्वैव आयामि। स उक्तवान् । "भोः अस्याः गोः जरावस्था संप्राप्ता। एतादृशा गावः द्वादशवत्सरं यावत् क्षीरं ददति। अस्याः वयः चतुर्दश। किंतु समांसमीना भवतीति" न्यवादीत् । अन्यच्च उक्तवान् "वत्सः यदि प्रांशुर्भविष्यति तं विक्रीय तद्धनं संपादयितुं शक्यते। गां पिण्याकम्, आढ़कधान्यमपि चारयामि। धनव्ययोऽपि भवति।

त्र :– तर्हि समर्थेभ्यः विक्रयणीयः।

त्र :– तदप्यन्विष्टं मया। यः कोऽपि क्रेतुं नैवायाति। एकः पृष्टवान् शतरुप्यकैः दीयतामिति। तस्य वत्समपि क्षीरं क्रीत्वा पाययामि।

त्र :– समीचीनमस्ति। मनुष्येभ्य एव पर्याप्तं क्षीरं नास्ति। पुनस्तर्णकेभ्यः क्षीरान्वेषणम् ।

ा :– (*पत्रेण सहागत्य*) अरे किमत्र तिष्ठतः। पत्रवाहः पत्रमानीतवान् । कुतः आयातम् एकवारं श्राव्यताम्। मम उपलोचनं नास्ति।

त्र :– (*पठति*) कुशलम्, विशाखा।

तर्कव्याकरणसाहित्यवेदान्तशास्त्रपारंगतानां जनकानां सकाशे लेखनीयं यदुभयकुशलोपरि, भवतां पत्रं समधिगतम् । तर्कशास्त्रे अत्यन्तनिपुणा भवन्तः वादेषु सर्वानपि वादान् पूर्वपक्षीकुर्वन्ति, किन्तु इदं न पूर्वपक्षयन्ति यत् "तदपि न मुञ्चत्याशापिण्डम्" इति।

अर्धमात्रालाघवेन पुत्रोत्सवं मन्यमाना भवन्तः अर्धाणकुन्यूनीभावे कपिगोत्रजा भवन्ति भवन्तः।

तां :– अहो कथं लिखितमनेन।

प्र :– (*पठति*) सहृदयानां भवतां तरुणस्य अभिरुचिमज्ञात्वैव अन्येषां सकाशात् धनं स्वीकृत्य विवाहनिश्चयः अत्यन्तशोभावहः।

वेदान्तविद्याखनीनां भवतां ज्ञानं धनविषयं विना सर्वत्र मिथ्या ज्ञापयति। धनब्रह्मणोः तादात्म्यभावाना अतीव हृदयंगमा । अहो

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्धातिबोधाचरणप्रचारता: भवतां विद्यानाम्। अधुना खलु साश्रया
सकला विद्याः। भवन्तः खलु सकलशास्त्रप्रवीणाः।

स :- सम्यक् लिखितवान् । अधुनाऽपि ज्ञातं वा ?

रा :- अरे ! जनिं प्रदाय पोषितवन्तं मां प्रत्येवं लिखति ?

स :- भवत एव। किञ्चदग्रे पठामि। सम्यगस्ति। अहं M.B.B
प्रथमश्रेण्यामुत्तीर्णः।

रा :- (*सानन्दम्*) मम बालः सर्वाः परीक्षाः प्रथमश्रेण्यामेव उत्तरति।

स :- अपि च भारतात् अनूपदेशं (*दुबाई*) गन्तुमवसरो लब्धः। आगामिनि
गन्तव्यम्।

रा :- द्वीपान्तरगमनम्। समुद्रतरणं प्रायश्चित्तार्हम्।

स :- तद् भवतां समये। अधुना सर्वोऽपि देशः द्रष्टव्यः। अग्रे पठामि (प
भवतां कामेशानां च आबाल्यं मैत्री विद्यते इति भवद्भिरेव निवेदित

रा :- आं....... किमस्ति, व्यवहारलाभार्थमेव।

स :- तेषां कन्या उषा अत्रैव B.Sc. (*home–science*) पठति।

रा :- किं तया सह विवाहं कर्तुं वाञ्छति ?

स :- (*पठति*) तया सह मम।

रा :- मम ?

स :- प्रयाणं भविष्यति।

रा :- प्रयाणमेव खलु।

स :- अतः मम Professor गतसप्ताहे उभयोर्मतं ज्ञात्वा विवाहमकुर्वन्।

रा :- अये सुपुत्र ! किं कृतं रे ! तव विवाहस्य दर्शनभाग्यमपि नास्ति मम।
कृते खलु सर्वमेतत्समार्जितम्। तव विवाहे यौतुकं बहु आयास्यतीति
गृहं प्रभज्य नूतनं भवनं निर्मीयते। तदर्थं ऋणमपि कृतम्। तदृणार्णाय
भाविश्वशुराणां सकाशात्पादलक्षरूप्यकाण्यपि स्वीकृतानि। तस्य स
कथं मुखं दर्शनीयम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प :- (*सगद्गदम्*) न दुःखं बहुमिलनम्। तथापि संजातं सङ्गमनम्। अस्तु अधुना आवां सखायौ।

स :- यूनां मनः अज्ञात्वैव कोऽयं व्यवहारः ? (*रामशर्माणं प्रति*) अस्तु रामशर्मणिः! भवन्तः एकवारं गत्वा आशिषः प्रदाय आयन्तु। गृहिण्या सह गच्छन्तु।

रा :- किं कार्यम्। तथैव करोमि। गृहमेतत् परात्परायैव दास्यामि। मम किमर्थम्? तेभ्यः पत्रं लिखन्तु।

स :- अधुनापि ज्ञातं खलु। ईदृशं नष्टं यौतुकधनेनैव आयातमिति।

उत्तमं स्वार्जितं वित्तम्।
स्त्रीवित्तमधमाधमम् इति।

इति शम्।

*

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

प्रेमरेखा

भूमिकाः

1. पशुपतिः – शकुन्तलायाः अलीके प्रेम्णि ऊहालोके विचरन् युवा।
2. मधुकुमारः – पशुपतेः मित्रम्।
3. मूर्तिः – प्रेमकलापे सफलः।
4. रघुपतिः – शकुन्तलायाः पिता।

प्रहसनमिदं श्री ए.वी.वी. सत्यनारायणस्य मित्रधेयस्य तेलुगुरूपकस्य परिष्कृतं संस्कृतरूपान्तरितम्। छात्रावस्थायां तिरुपतिविद्यापीठे 1982 तमे वर्षे, जम्मूविद्यापीठे 1985 तमे च वर्षे प्रदर्शितम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

प्रथमरङ्गः

(स्थलम् :– मधुनिवासः ।) (पशुपतिः प्रविशति)

पशुपति :– मधो ! रे मधो ! इतस्तावदागच्छ । अन्तः किं करोषि ? किं प्रातरशनम् ? (*स्वगतम्*) सदा अस्य भक्षणे एव तत्परता । किमपि न श्रृणोति । दन्दशूक इव इतस्ततः चरति, देवानां प्रियः ।

मधु :– (*प्रविश्य*) अये ! रे ! अयमागच्छामि । किं कोलाहलं करोषि ? किं प्रातरेवागतोऽसि ? दन्तधावनं कृतं, न वा ? कुत्रापि गन्तव्यम् ?

पशु :– नहि नहि । ... ते हितमुपाहतुर्म्।

मधु :– किं लड्डुकान्यानीतानि ? किं वा नूतनफलन्याहृतानि ? मह्यं किमानीतानि?

पशु :– सदा तव अशने एव रुचिः । आनीतानि, अचिरेण दास्यामि । मध्ये कांचित् शुभवार्तां शृणु।

मधु :– किम् ? शुभवार्ता ? तर्हि अवश्यं मधुरं दातव्यम् । तत एव श्रृणोमि ।

पशु :– रे कथनानन्तरं दास्यामि। प्रथमतः शृणु । अयि ! मित्र ! मया... सा... मया सह ...

मधु :– (*सक्रोधम्*) हो ! किं गुरगुरायसे ? वक्तव्यं तावत् स्फुटं वद । किमेतैः वक्रभणितैः ? साक्षात् कुतो न भणसि ? किम् ? वक्तव्यमिति मया अनुरुद्धोऽसि ? भवतु अत्रैव तिष्ठ । साधयामि ।

(इति गन्तुं यतते ।)

पशु :– अरे ! रे ! ... श्रृणु तावत् मा गाः । लोकेऽस्मिन् त्वत्तोऽधिकः कोऽस्ति मे? यदि त्वया न श्रूयते, अहं निराहारदीक्षां करोमि ।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

प्रेमरेखा

भूमिकाः

1. पशुपतिः – शकुन्तलायाः अलीके प्रेम्णि ऊहालोके विचरन् युवा।
2. मधुकुमारः – पशुपतेः मित्रम्।
3. मूर्तिः – प्रेमकलापे सफलः।
4. रघुपतिः – शकुन्तलायाः पिता।

प्रहसनमिदं श्री ए.वी.वी. सत्यनारायणस्य मित्रघेयस्य तेलुगुरूपकस्य परिष्कृतं संस्कृतरूपान्तरितम्। छात्रावस्थायां तिरुपतिविद्यापीठे 1982 तमे वर्षे, जम्मूविद्यापीठे 1985 तमे च वर्षे प्रदर्शितम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

प्रथमरङ्गः

(स्थलम् :– मधुनिवासः ।) (पशुपतिः प्रविशति)

पशुपति :– मधो ! रे मधो ! इतस्तावदागच्छ । अन्तः किं करोषि ? किं प्रातरशनम् ? (*स्वगतम्*) सदा अस्य भक्षणे एव तत्परता । किमपि न श्रृणोति । दन्दशूक इव इतस्ततः चरति, देवानां प्रियः ।

मधु :– (*प्रविश्य*) अये ! रे ! अयमागच्छामि । किं कोलाहलं करोषि ? किं प्रातरेवागतोऽसि ? दन्तधावनं कृतं, न वा ? कुत्रापि गन्तव्यम् ?

पशु :– नहि नहि । ... ते हितमुपाहर्तुम्।

मधु :– किं लड्डुकान्यानीतानि ? किं वा नूतनफलन्याहृतानि ? मह्यं किमानीतानि?

पशु :– सदा तव अशने एव रुचिः । आनीतानि, अचिरेण दास्यामि । मध्ये कांचित् शुभवार्तां शृणु।

मधु :– किम् ? शुभवार्ता ? तर्हि अवश्यं मधुरं दातव्यम् । तत एव श्रृणोमि ।

पशु :– रे कथनानन्तरं दास्यामि। प्रथमतः शृणु । अयि ! मित्र ! मया... सा... मया सह ...

मधु :– (*सक्रोधम्*) हो ! किं गुर्गुरायसे ? वक्तव्यं तावत् स्फुटं वद । किमेतैः वक्रभणितैः ? साक्षात् कुतो न भणसि ? किम् ? वक्तव्यमिति मया अनुरुद्धोऽसि ? भवतु अत्रैव तिष्ठ । साधयामि ।

(इति गन्तुं यतते ।)

पशु :– अरे ! रे ! ... श्रृणु तावत् मा गाः । लोकेऽस्मिन् त्वत्तोऽधिकः कोऽस्ति मे? यदि त्वया न श्रूयते, अहं निराहारदीक्षां करोमि ।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधु :- तर्हि, शीघ्रं भण।

पशु :- बाढम्। चक्षुरुन्मीलनं कृत्वा भणामि। सावधानं श्रोत्रोन्मीलनं कुरु।

मधु :- (*अंकान् गणयन्*) 1, 2, 3, ...

पशु :- सा सा सा ... शकुन्तला (*उच्चैः*)

मधु :- हो ... शकुन्तला वा ... त्वमघटनघटनापटीयान्। तर्हि नूनं भवान् कालि इव कविसम्राट्पदमलंकर्तुं समर्थः। निरवधिस्ते मेधा।

पशु :- मम किमपि नास्ति। सर्वमेतत् तव सहकारफलमेव। एहि अ गच्छावः। (*इति मधुं गृहीत्वा गन्तुं यतते*)

मूर्ति :- (*प्रविश्य*) सा खलु सा ... अहहा ... अद्य का दशा मे मनसस्संपन्ना? ... अमृतेन विषेण च मे मनो युगपदभिषिक्तमस्तीति (इति शरी लक्षयन्) हन्त! भग्ना दन्ताः। संधिबन्धाः शिथिलीकृताः।

पशु :- (*वीक्ष्य*) अहो ... मूर्तिरागतः। कुतः खिन्न इव भाति। पृच्छामि।

मधु :- (*त्वरया*) किं भोः ...किं देहे ?

पशु :- गार्दभ्या पूजितोऽसि किम् ?

मधु :- सारमेयः अन्वधावत् किम्? किं जातम्? सावधानं वद। किं संघटितं

मूर्ति :- (*सरोषम्*) किं संघटितम्? अधुना मम मरणमेव शरणम्, नान्यत् किं सा अस्ति किल, श्लाघ्ययौवना सा ... सैव मामेवमकार्षीत्। प्रेमाणं न कपोलं याचमानस्य मे कपोले चपेटिकां दत्तवती।

पशु :- (*साश्चर्यम्*) किं तावद्धैर्यं तस्याः अबलायाः। अरे कासौ ते प्रियसखी

मधु :- किमस्माभिः ज्ञातुं शक्यते ? किं नाम्नी सा ? कुत्र वसति ?

पशु :- किं तस्याः पितरौ जीवतः ?

मूर्ति :- रे ... मम शिरश्शूलं न जनयत। किमपि न जानामि।

पशु :- रे! मूढपुरोगामिन्! किमपि न जानासि ? तस्याः गृहमपि न जानासि मे प्रिया ... सखी... यौवनं... किमपि किमपि प्रलपसि। सर्वमज्ञा

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri
कोऽयं व्यवहारः ? न्यूनातिन्यून तद्द्वयमेव ज्ञातव्यम् (*मधु वीक्ष्य*) खलु श्रीमन् ?

मधु :- असमीक्ष्यकारिन् ! त्वमत्र किमपि न जानासि ? अनिच्छन्ती कन्या न कदापि अपेक्षितव्या ।

मूर्ति :- किं चिन्तया रे ?... एतन्मे भवितव्यमासीत् । अभूत् । अद्य प्रातः कस्य वा मुखमपश्यम् ? न जाने। (*इति बाधामभिनयति ।*)

पशु :- रे... अहं न भवादृशः । सा शकुन्तला, सौन्दर्यमन्दिरं मे शकुन्तला । सा मदिरायतलोचना अपांगवीक्षणैः करुणया अपश्यत् । मे हृदयकवाटमपि उदघाटयत् ।

मूर्ति :- अरे रे –... मैव मुच्चैर्भण रे । शनैराचक्ष्व । वेपते मे हृदयम् । वर्धते मे वेदना । उद्गच्छति दुःखसागरः (सक्रोधम्) त्वं मां रोदयितुमेवं वदसि रे... जानामि । ईर्ष्यालो ! त्वमेव किं समर्थः ? अहं यदि अनुमन्ये, सहस्राधिकाश्शकुन्तलाः मां परितः आगमिष्यन्ति नर्तिष्यन्ति च । आम्... पश्य ।

पशु :- दर्पवाक्यानि मा भण रे। ...महात्मागान्धी किमभणत् ? आचरणं प्रथमं, वचनमन्तरम् इति किल ? त्वं प्रथमतः आचर।

मूर्ति :- (*सनिर्वेदम्*) अधुना किं कार्यं मे, कथं वा तत् कर्तव्यम् ?

पशु :- प्रथमतः चिकित्सा प्राप्तव्या । तर्हि अस्थीनि सुष्ठु भवेयुः । परीक्ष्य कर्तव्येषु कार्येषु त्वरा न कार्या। अतः स्वास्थ्याधिगमनं यावत् एतादृशेषु व्यवहारेषु भागं न ग्रहीष्यामीति प्रतिज्ञा करणीया।

मधु :- अतिशीघ्रं तटाकस्नानं कर्तव्यम् । तदनु भोक्तव्यम् ।

मूर्ति :- (*सोद्वेगम्*) तूष्णीं भवतम्। ईदृशमालापनमवान्छनीयमेव सर्वदा। मा व्यस्मार्ष्टम्, शपथं करोमि। अयमस्ति रे मूर्तिः रे... भवन्मित्रम्, अयं मूर्तिः त्रिलोकसुन्दरीं तां सप्ताहाभ्यन्तरे परिणेष्यति। नो चेत्, श्मश्रुमुण्डनं कारयिष्यति।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पशु :- तथास्तु । तदुच्चैर्भण । देवः अनुगृह्णातु ।

मूर्ति :- किं मां परिहससि ? पश्य मे प्रतापम्।

पशु :- रे ! अद्य तव चित्तचाञ्चल्यं वर्धते । तव सहवासेन अस्माकमपि तदे[व] भविष्यति ।

मूर्ति :- (*साग्रहम्*) रे ! परिहसन्तु ...परिहसन्तु ...अहं यदि पुमानेव न स्यां, दिनद्वये एकां परिणीय भवतां पुरस्तया सह न विहरिष्यामि । द्रक्ष्यथः मे प्रतापम् ।

पशु :- रे ! पश्यावः...

मधु :- तथैव...।

मूर्ति :- रे ! अपसरतम्। मित्रस्य सामर्थ्ये शंकां प्रदर्शयन्तौ भवन्तौ किं में मित्रे

पशु :- रे जाम्बवन् ! त्वमेकः ! ... कयापि अबलया ताडितः आवां द्वौ पुरु[षौ] अपसारयसि किम् ? द्रक्ष्याम्यहं तव प्रतापम् ।

मधु :- अनेन क्षमापनपत्रं लेखयिष्यामः किम् ?

मूर्ति :- रे... अहमपि द्रक्ष्यामि । (*इति निष्क्रामति*)

पशु :- रे मधो ! अयं कामयते किल, कामयते । भल्लूकमूर्तेरस्य मुखं दृष्ट्वा कापि भाषेत वा ? अस्य प्रेम्णः का कथा पुनः ?

मधु :- अहो ! साधु भणितम्, यद्यपि विलम्बः। सौन्दर्यविषये अहमेव प्रथमः, त[्वं] तु द्वितीयः। आवयोः सौन्दर्यं कथमस्ति ।

पशु :- गुरो ! सत्यं भणसि। तत्र ... सा... इदानीमेवोक्ता खलु । तया स[ह] किमासीदिति वदामि सकृत् ।

मधु :- रे ! न केवलं सकृत्, असकृत् कथय । प्रारभ्यताम् । किन्तु ...

पशु :- किन्तु... रे... किमपि भणितुकामोऽसि ।

मधु :- ममापि तस्याः परिचयं कल्पय एकवारम्। नो चेत् किमपि तव वाक्यं श्रोष्यामि... आं।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पशु :- किमङ्ग ! अल्पसंतोषिन् । उन्नतेच्छोऽहं लघीयस्सु न किमपि स्खलिष्यामि । नह्येकवारं बहुधा परिचाययिष्यामि । किन्तु अहमेव प्रथमः ...।

मधु :- नहि नहि... अस्मिन्विषये त्वमेव पुरोगामी। अहंतु अनुगामी भवामि । रे पशो ! कश्चन संदेहः ...?

पशु :- कस्ते संदेहः ? पदे पदे भारते जनसन्तानमिव तव संदेहसन्तानमुत्पद्यते । कथय, कस्ते संदेहः ?

मधु :- अयम्, अयमेव मूर्तिः सत्यं कामपि उद्वक्ष्यति रे ?

पशु :- आँ... किमुद्वक्ष्यति ? ...उदुह्य आगमिष्यति । उद्वाहवन्धमात्मनः उद्वन्धनरज्जुबन्धं कारयिष्यति। शरीरं पुनः जरयिष्यति। एकदा दन्तभङ्गानन्तरमपि श्वपुच्छमिव तस्य मतिर्न ऋजुर्भवति। अनुभवो भवतु।

मधु :- पशो ! त्वं कदाचित् कयाचिदवज्ञात श्चेदसूनेव त्यक्ष्यसि। आदर्शप्रेम्णस्तव चित्रपटाविष्करणमपि केनापि मन्त्रिणा करणीयं भविष्यति । तव अस्थिनिमज्जनमपि भारतस्य सकलासु नदीषु... ।

पशु :- रे.. रे.. रे किं मामनवसरे मारयितुमिच्छसि ? आँ ज्ञातम् हृद्गतं, यदस्य मरणानन्तरं शाकुन्तलां स्वयम् ...।

मधु :- शान्तं पापम्। किमावयोः स्नेहमेतादृशं मन्यसे ? अरे... यदि शकुन्तला स्वयं मामनुरक्ता भवेत्, तथापि मय्येव दोषमारोपयसि किम् ?

पशु :- अरे... ईर्ष्यालो !... गच्छाम्यहम् । अत्र मम अवकाशो नास्ति खलु । सूक्तं यद् उभयायत्ता नश्यतीति । (*गन्तुं यतते*)

मधु :- पशो ! तिष्ठ ! किं मामन्यथा संभावयसि । त्वयि रेणुपरिमाणापि नास्ति मे असूया । यदि न विश्वसिसि किं भाषणेन ? अहमेव गच्छामि । (*गन्तुं प्रवर्तते* ।)

पशु :- मधो ! मामेकाकिनं परित्यज्य गच्छसि वा ? निष्करुण ! पलायसे। मया अधिरोढव्यं कीर्तिशरीरं तव कृपाच्छायायामिति चिन्तितम् । सहपानाशनशयनाः वयं यावज्जीवम् एवमेव भवेम, इति चिन्तितम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधु :- अरे ! पशो ! मा रोदीः । कदापि सखा न भवेयुः । पुनर्जीविते क
मिलिष्यामः। अधुना तव शकुन्तलायाश्च मध्ये अन्तरायो नाहं भविष्या
हिमालयेषु श्मश्रुवर्धनं करिष्यामि । पुनरागमिष्यामि ।

पशु :- अरे ! सखे ! मदीयमेतत्सर्वं परिहासविजल्पितम् । पुनरेवं न भणिष्यां
विरम रे तव प्रयाणात् । परिहासार्थमुक्तेकिमरे ते नासाग्रकोपः। शकुन्तलां प
तया संभाषणं कुरु । सा हसिष्यति ।

मधु :- किं तथाहं संभाषणं कुर्याम् ? मम भाषणे सा किं नूनं हसिष्यति ?

पशु :- जोषमास्यताम्, त्वमित्युक्ते त्वमेव किम् ?

मधु :- मम भाषणे कठोरतैव भवेद्वा ? किं हसनकारणं न स्यात् ?

पशु :- मधो ! कुतो विलम्बः ? गच्छावः ।

मधु :- कुत्र गन्तव्यम् ?

पशु :- तत्रैव।

मधु :- तत्रैवेत्युक्ते ?

पशु :- तत्रैव... । शकुन्तलागृहे ।

मधु :- किमाहूतो भवान् ?

पशु :- किं वाचा वक्तव्यम् ? अयं जनः तस्याः मनोगतान् भावान् सम्यक् जानां
स एव मे कलाविशेषः। मूकताध्यापनं तस्याः कला।

मधु :- तर्हि मम ?

पशु :- शनैरिवानुगमनं तव ।

मधु :- अरे पुनर्मामुपहससि ? नागच्छामि त्वया सह ।

पशु :- वयस्य ! कोपकारणमत्र किमपि नास्ति। परिहासार्थमुक्तम्। गच्छावः।

मधु :- किमस्माकमलसभावः ?

पशु :- आलस्यादमृतं विषमिति वदन्त्यभिज्ञाः। साधयावः, एहि।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(उभौ निष्क्रान्तौ)

द्वितीयः रङ्गः

(रघुपतेः गृहम्)

रघुपति :- (*प्रविश्य स्वेदबिन्दून् सम्मार्जयन्*) अब्रह्मण्यम्... कीदृशः कालस्समागतः अधुनातना युवानः, दास्याःपुत्राः अविनीताः दुर्मदाः, अवकाशो यदि स्यात् ... कन्याः दृष्ट्वा कोलाहलं कुर्वन्ति। अधुना कन्यानामुद्वाहो न समस्यात्मकः... एषां रक्षणमेव समस्यात्मकं भवति। एकः इतः आगच्छति ...अन्यः ततः आगच्छति । ...प्रासादादपरः ...भित्तिगर्तात् कश्चन । एषां जातुचित् शिखाविच्छेदनं कार्यम् । प्रदर्शयामि मे पौरुषम्। (*बालां प्रति*) जाते !...जाते !(*स्वगतम्*) अस्याः अधुना ध्यानं प्रचलति... इदानीन्तनानि चलनचित्राणि न द्रष्टव्यानीत्युक्ते नैव शृणोति... किं कुर्मः ? (*आसने उपविश्य सजृम्भं स्वपिति।*)

पशु :- (*गायन्*) सुन्दरि ! त्वादृशदिव्यस्वरूपं लोकेऽत्र कुत्रापि नास्ति खलु, सुन्दरि...सुन्दरि ।।

मधु :- अरे ! गानं मा कार्षीः कोऽपि श्रृणुयात् ।

पशु :- भीरो !...कातर !...अन्यस्य श्रवणे कोऽस्त्यस्माकंबाधः ? वयं च प्रेमिणः। ...तिर्यग्वर्त्म पिहितम् ... राजमार्गेण प्रविशावः । कोऽपि यदि श्रृणुयात् निमील्य श्रवणे गच्छेत् ।

मधु :- साधु भणितम् साधु... इदमेव शकुन्तलागृहम् । किं दृष्टिपथं नायाति ।

पशु :- दृष्टं मया... अहो ! कण्वाश्रमं स्मारयति !

मधु :- पार्श्वे प्रासादः कस्य ?

पशु :- यक्षप्रश्नाः किमर्थम् ? यद्यवकाशः तवापि प्रासादः, त्वमपि अनूप (*gulf*) देशान् गच्छ । प्रासाद एको निर्मीयताम् । अहो... शकुन्तला अस्ति वा नास्ति गृहे ।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[रघुपतिः पुरः पुरः]

मधु :- अरे ! कोऽयम् ? अपशकुनपक्षी... तद्गर्जनं किम् ? किं निद्राति ?

पशु :- अपि शकुन्तलाबन्धुर्न हि?

मधु :- आँ... अयं कोऽपि सन्यासी आकण्ठं भुक्त्वा निद्राति ! तथापि वयम्... अत्र आगत्य ...वक्तव्यांशाः ईदृशा वा ? किमेतादृशान् प्रति...। शकुन्तला।

पशु :- एवम् ...सम्यगुक्तं भवता... शकुन्तला अस्ति वा ? पश्य पुरः। अन्तः प्रविश।

मधु :- किमप्यहं न जानामि... प्रथमतः त्वं गच्छ । अहमनुपदमेव आगच्छामि।

पशु :- नैव तथा । तव श्रेयोभिलाषी वदाम्यहम् ...श्रृणु, त्वं गमिष्यसि यदि...

मधु :- पादरक्षाभ्यां सत्कृतो भविष्यामि ।

पशु :- अपलापिन् ! तूष्णीं भव... पादरक्षासत्कारः किमर्थः ? ...यदि वाञ्छसि, अहं ताडयामि। ...शकुन्तला देवता । तस्याः पादस्य अधः पिपीलिकाऽपि सुखं शेते...।

मधु :- (*रघुपतिं पश्यन् सालोचनम्*) अयं कोऽपि ग्रामीण इव भाति । किंचिद् धनं दत्वा अस्माभिः स्वकार्ये विनियोक्तुं शक्यते । अहो ! तत्रैव स्तः उपानहौ। (*परिक्रम्य अवलोक्य च*) स्थूला यष्टिरपि ।

पशु :- सखे न भेतव्यम् ... किं पश्यसि ? ... उत्थाप्यताम् ...

मधु :- अये ...हे ...वृद्धशिखामणे ...अङ्ग ! उत्थीयताम् ... उत्थीयताम् ।

पशु :- (*आहूय*) किं तव सकाशेऽग्निकाष्ठमस्ति। किंचिच्छोत्रे आलोड्यताम्, नो चेत् नासिकायां जलं पूर्यताम्।

मधु :- पापं रे । अस्माकं नेत्रे नष्टे भवतः । अये ! तात ! वृद्ध ! हे । (*इति उत्थापयति*)

रघु :- (*उत्थाय*) किं भोः । कौ युवाम् ? किमन्यत्कार्यं नास्ति युवयोः ?

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधु :- आवां त्वदीयौ, त्वमस्मदीयः । भगवतः श्रीरामस्य आञ्जनेय इव त्वमस्माकं कार्यं कुर्याः । स्वीकुरु (*धनं ददत्*) किंचित् काफीपानं कुरु ।

रघु :- भवतु। अहमेवान्ते प्रक्ष्यामि । इदानीं स्वपुटके तद्धनं निक्षिप्यताम् । किं साहाय्यमावश्यकं भवताम् ।

मधु :- अयं मम मित्रम् । एकां कामयते ।

रघु :- आँ... किं तात ! तव मुखं दर्शय ।

पशु :- मम नाम पशुपतिः ।

रघु :- (*मधुमुद्दिश्य*) तव नाम किम् ?

मधु :- मम नाम मधुः भोः ।

रघु :- उपविशताम् युविकशोरौ । किमुक्त्वा गृहादागतम् ? (*परस्परं विलोकयतः*) अङ्ग ! किमपि नास्ति । तूष्णीमेव पृच्छामि । इदं कुलपतिरघुपते गृहम् । युवाभ्यां जागरूकाभ्यां भाव्यम्।

मधु :- कथं जागरूकाभ्यां भाव्यम् ? किञ्चिद्विव्रियताम् । पञ्चविंशति रूप्यकाणि दास्यामि ।

रघु :- प्रथमतः दीयताम्... अहं वदामि... वदामि भो स्तात, वदामि ।

मधु :- सविस्तरमुच्यताम्। विवरणं निर्णयप्रदं भवतु । स्वच्छया सरलया सुन्दर्या च शैल्या कथ्यताम्।

रघु :- किमर्थमागतौ युवाम् ?

मधु :- (*परवशः सन्*) काचित् कन्याललामभूता शकुन्तला ।

पशु :- सा सौन्दर्यमन्दिरम् ।

(उभौ मिलित्वा गायतः) –

पङ्कजवदना चम्पकनासा कुरङ्गनयना कुत्र कुत्र कुत्र कुत्र शकुन्तला ?
जलधरकेशा शशधरवक्त्रा त्रिभुवनप्रथिता कुत्र कुत्र कुत्र कुत्र शकुन्तला ?

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मदगजगमना मदसंचारा मणिमञ्जीरा कुत्र कुत्र कुत्र कुत्र शकुन्तला ?

नटीव नृत्यति नर्दति खेलति करोति कुतुकम् कुत्र कुत्र कुत्र कुत्र शकुन्तला ?

किं पाययिष्यति ? किं खादयिष्यति ?

किं दापयिष्यति ? कुत्र कुत्र कुत्र कुत्र शकुन्तला ?

मधु :- तात ! शकुन्तला कस्मिन्नपवर्गे स्वपिति ?

पशु :- शकुन्तला किं करोति ?

मधु :- किं द्वारि निरीक्षते ?

पशु :- किमस्मानाह्वयति ?

मधु :- सर्वमेतत्पृष्ट्वा झटित्यागन्तव्यम् । तव पुरस्कृतिः सद्य एव दास्यते ।

पशु :- बाढम् । तत्र तस्याः पिता पितामहो वा स्यात् त्वया अतिनिपुणं गन्तव्यम् । अयि ! अस्माकं विषयः तेभ्यो न वक्तव्यः ।

मधु :- अयं तातः साधुपुरुषः । ... उत्थीयताम् तात उत्थीयताम् ।।

रघु :- किमुत्थानं कार्यम् ! शावक ?

मधु :- एवम्, शीघ्रमुत्तिष्ठ ।

रघु :- उत्तिष्ठामि ... उत्तिष्ठामि ... उत्तिष्ठामि ... उत्थितोऽहम्। अयि डिम्भक ! सा यष्टिः दीयताम् । (*मधुः ददाति*) तात ! एते किं वदन्ति ?

पशु :- शकुन्तला।

रघु :- (*यष्टिं दर्शयन्*) रे ... इयम् ।

मधु :- यष्टिः ।

पशु :- इयं कुत्रोपयुज्यते ?

रघु :- अहं वदामि तात ! अहं वदामि । इत आगच्छ । (*मधुः गच्छति, पशुपतिरपि गच्छति । उभौ ताडयित्वा केशग्रहणं कृत्वा*) किं रे धूर्तौ ...

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[illegible] ? शकुन्तला [illegible] आगाता [illegible] गणयेत् । जागृतं तां क्षमापयितुम् ।

मधु :- त्वं कः ? ...गृहं तव वा ? ...कुलपतिरघुपतेः किलेदं गृहम् ।

पशु :- शकुन्तलायाः गृहमेतत्... ते क्षमापनं करणीयं वा ? कस्ते प्रतापः ?

रघु :- रे धूर्तशिखामणी । ...जागृतम् ...सावधानाभ्यां भूयताम्, क्षमापनं यदि न करिष्यते, भवतां केशाः नैव त्यज्येरन् । युवयोः शिरसोः मुण्डनं सुधाचित्रणं च भविष्यति ।

मधु :- नूनमयं शकुन्तलायाः पिता कुलपतिरघुपतिरेव।

पशु :- कथं जानासि ?

मधु :- मेऽन्तःकरणमुद्घोषयति। अधुनापि न जानासि ? पृष्ठं ते विमानायते, अङ्गविकारो भविष्यति ।

रघु :- जातौ ! नास्ति त्वरा, तदनन्तरमेव गच्छतम् । नास्ति त्वरा (*इति शिरसी परस्परं ताडयित्वा*) अस्तु । गच्छतम् । पुनरेतादृशौ मा भूतम् । पुनरेवं करणे वामस्थीनि गणयेयम् । अपेतम् ।

(*निष्क्रामति, मधुः पशुश्च निष्क्रामतः*)

(*स्वगृहं गच्छन्तौ मधुपशुपती परस्परं भाषेते*)

मधु :- लड्डुकानि खादितुमागतेन मया एवं भविष्यतीति स्वप्नेऽपि नाभ्यूहितम्। (*इति नासिकोच्छ्वासं करोति*)

पशु :- आवयो र्मार्गे किं वा दुःशकुनमासीत् !

मधु :- शुभशकुनं दृष्ट्वैव पुनरागमनम्।

पशु :- पुनरागमने सन्धिबन्धाः विगलिता भवेयुः। ...आवयोः अस्थीनि पत्रालयद्वारा गृहं प्रेष्येरन् ।

मूर्ति :- (*प्रविश्य*) अहो ! अत्र मधुमशुपती ! कुत आयातौ युवाम् ? अपि कुशलम् ?

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधु :- कुशलमेव ... न मया तर्कितं यत् लड्डूकानि खादितुमागतस्य मे एतद् भविष्यतीति...।

पशु :- (*सत्वरम्*) किमावयोः संजातम् ? न किञ्चित् । सुष्ठु भवेम । मूर्ते ! तव प्रेमायणं कथमागतम् ?

मधु :- अस्माभिः श्रोतुं शक्यते वा ?

मूर्ति :- (*सगर्वम्*) अवश्यं श्रोतव्यम् ...तदेव वक्तुमागतोऽस्मि । ...अहं तस्मिन् दिवसे ...चपेटिकां दत्तवतीमेव उद्वहामि । ...अस्माकं जगन्नाथस्य आलये। अवश्यमागन्तव्यम् । ...अयं शुभलेखः ।

(इति शुभलेखं प्रदाय निष्क्रामति)

पशु :- अरे ! मूर्तिः तीर्णप्रतिज्ञार्णवः अभूत्।

मधु :- वयमपि तथैव।

पशु :- कथम् ?

मधु :- क्षमापनं ... दूषणानि ... ताडनानि ... गच्छ, किमर्थमत्र सर्वम् ?

पशु :- अस्माकं हस्तेषु सर्वा रेखा स्सन्ति । किन्तु एका... सा रेखा नास्ति ।

मधु :- का... सा रेखा... शकुन्तलारेखा वा ?

पशु :- नहि नहि प्रेमरेखा... प्रे प्रे प्रे प्रेमरेखा ।

(यवनिकापतनम्)

*

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

वञ्चकपञ्चकम्

(अभिनवं लटकमेलकम्)

भूमिकाः

1- कौलेयकः :- प्राड्विवाकः।

2- संग्रामसिंहः :- क्षात्रियापसदः, अट्टशूलादिपु पाचकः।

3- दिगम्वरः :- वाणिज्ये नष्टधनः कपटः क्षपणकः, श्रेष्ठी।

4- कुक्कुटभूषणः :- पण्डितम्मन्यः द्विजवन्धुः।

5- जन्तुकेतु :- मूर्खः वैद्यः।

6- मञ्जरी :- नर्तकी, कौलेयकानुरक्ता।

7- दन्तुरा :- मञ्जरी-परिचारिका, वृद्धा।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

प्रथमः अङ्कः

(स्थलम् :- नगररथ्या, समयः - सायं चतुर्वादनम्)

(संग्रामसिंहमनुधावन् क्षपणकः दिगम्बरः श्रमविन्दून् मार्जयन् श्वासालसः प्रविशति।)

दिगम्बर :- अर्हन्, अर्हन्, संग्रामसिंहेन मूर्खेण अनपराद्धा छागी में निहता। या च सायं मदिरापानवेलायां शूल्यभक्षणार्थं विहारोद्याने घासकवलैः सुतनिर्विशेषं पालिता। तमधुना अनुधाव्य न्यायालयं संप्राप्य वध्यस्थानं नूनं नेष्यामि। (*इति धावति*)

संग्रामसिंहः :-
(*धावन् श्रान्तुरः वृक्षच्छाये किंचित् स्थित्वा*) अट्टशूलेपु पाचकः प्रतिदिनं विरुद्धं मधु पीत्वा भर्जितमांसभक्ष्यैः सम्यक् संवर्धितः, परं कार्यभारात् भ्रांतः भीतः ततः नगरात् नगरं पलायितः। परम् अट्टशूले इव सद्यःपक्वकुक्कुट-मयूर-च्छाग-वराह-मृगमांसान् वृथा को वा खादयति मया। (*लालाग्रस्तजिह्वः अधरमालिहन्*) चिरात् अद्य जैनविहारप्राङ्गणे कपटक्षपणकस्य छागीं पीवरजङ्घां दृष्ट्वा जागृतपूर्ववासनया मडमडायितवान्। (*इतः ततः अवलोक्य*) परं स धूर्तः कथमपि मामुपलक्ष्य अनुधावति। (*आगच्छन्तं सुदूरे दिगम्बरं संलक्ष्य*) अहो ! समीपमुपयातः। अत्रैव समीपस्थे गृहे आत्मानमाच्छाद्य तं वञ्चयामि। (*अग्रतो गृहमेत्य द्वारं ताडयन् उच्चैः*) रक्षन्तु ! रक्षन्तु ! मारयति। ताडयति। मारितोऽस्मि। अब्रह्मण्यम्, अब्रह्मण्यम्। शरणं, शरणम्।

दन्तुरा :- (*द्वारमुद्घाट्य स्वगतम्*) अरे, अयं कुतोऽपि भीतः, अस्तु अन्तः आहूय पृच्छामि भयकारणम्। (*प्रकाशम्*) मा बिभेहि, मा बिभेहि, (*द्वारं पिधाय हस्तेन समाश्वासयन्ती*) कः ताडयति ? कुतः ताडयति ? अत्र न कोऽप्यायास्यति। द्वारं पिहितं मया। वद, भयकारणम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संग्राम :- (इतस्ततो दृष्ट्वा आलयन्धनम् सुदूरस्थं दिगम्बरं दर्शयित्वा) अयमेव क्षपणकवेषधारी धूर्तः। अस्य च्छागी मया गर्दभीति मत्वा दण्डेन ताडिता, परं मम दौर्भाग्यात् सा मृता। ततः क्रुद्धः मामनुधावति। त्वमेव शरणम्, रक्ष मां मातः! जननि, अम्ब, (इति वामपाणिना प्रणमति)

दन्तुरा :- (स्पर्शसुखमनुभवन्ती स्वगतम्) युवजनस्पार्शसुखं चिराय श्रवणगोचरं प्रत्यक्षमनुभूयते। साधु। अस्य अवश्यमुपकारः कार्यः मया। (प्रकाशम्) समाश्वसिहि, को वा त्वां भीपयति, पश्यामि। तावता अत्रैव कुक्कुटकण्डोले संकुचिताङ्गः तिष्ठ। पश्यामि तम्। (इति कुक्कुट कण्डोलेन समाच्छादयति, दिगम्बरः द्वारं शब्दयन्, उच्चैः आह्वयति)

दिग :- अरे, मूर्ख, अस्मिन् गृहे निगूढ़ोऽसि ? किं मया न दृष्टम् ? द्वारमुद्घाटय। त्वामस्थिशिष्टं करोमि। त्वरया कवाटम् उद्घाटय। पश्यतो ममच्छागीं भक्षितवान्। तव अस्थिचूर्णेन मम शरीरं लेपयामि। उद्घाटय...., अन्यथा भन्जयामि कवाटम्। (इति दूरतः वेगेन "कपाटं भञ्जयति। अत्रान्तरे दन्तुरा कपाटमभितः आयाति। दिगम्बरः तस्याः उपरि पतति)

दन्तुरा :- (स्वगतम्) दन्तुरताया मम चिराय अनुरुपो वरः उपलब्धः। (शनैः शनैः उत्थाय पादास्थिभंगमभिनीय) मारितास्मि। आः कष्टम् (रुदन्ती) किं रे चक्षुषी न स्तः। अन्ध ! पङ्गो। मूढ़, मर्ख, रण्डापुत्र ! पशो ! गर्दभ ! शुनक, जम्बुक .....।

दिग :- (सलज्जम्) शान्तं पापम् ! स्त्रीस्पर्शः आश्रमविरुद्धः (कर्णौ पिधाय), अर्हन्, अर्हन्, साधुनिन्दा मास्तु। क्षन्तव्यः (इति पादौ गृह्णाति)

दन्तुरा :- (सप्रसादम्) अस्तु। किं कार्यम्, कुतः क्रुध्यसि ? कस्मै ?

दिग :- अकारणं मम पीवरजङ्घा छागी निहता अनेन, यश्च तव गृहे निगूढ़ः लक्षितः मया। कुत्र सः, तं मारयामि, ताडयामि। (इति अन्विष्यति)

दन्तुरा :- (सक्रोधम्) अन्ध ! समीपेऽपि पर्वताकारा नाहं लक्षिता। सुदूरे अत्र निगूढः कोऽपि लक्षितो वा ?

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिग :- (*सरोषम्*) लक्षितो मया। अलीकं भणसि। कुत्र निगूढः ?

दन्तुरा :- किमहम् अलीकं भणामि ? अत्र कोऽपि नागतः । यदि न विश्वासः, गृहे अन्विष्यताम्। लभ्यते यदि नीयताम्।

(दिगम्बरः अन्विष्यति। परं संग्रामसिंहः कुत्रापि न लक्षितः)

दन्तुरा :- (*सोत्प्रासम्*) लक्षितः किल, लक्षितः, अन्विष्टः खलु, लब्धो वा ? यः कोऽपि अत्र प्रविष्टः नोपलक्ष्यते। अवधारय।

दिगः- (*सलज्जम्*) क्षम्यताम् । सुदूरात् ममैव दृष्टिदोषः। पुनर्मिलामि तावत्। (*इति गन्तुं प्रस्थितः। अत्रान्तरे कण्डोलधूलिना पिहितनासारन्ध्रः संग्रामसिंहः क्षुतिं करोति। ततः दिगम्बरः कण्डोलात् तं कर्णग्राहमुत्थाप्य*) आः गृहीतो मया, वराक्या अनया सह मां वञ्चयितुं प्रवृत्तोऽसि ? वञ्चकानामपि वञ्चकोऽहम् ? तदधुना उभौ अवधारयतम् । (*इति ताडयति। ततः उभयोः मध्ये दशनादशनि, मुष्टामुष्टि, नखानखि, केशाकेशि युद्धं चलति। दन्तुरा विनोदं पश्यति*)

(अत्रान्तरे कौलेयकः मञ्जरीं मिलितुं तत्र आयाति)

कौलेयक :-(*स्वगतम् आगच्छन्*) प्राड्विवाकं माम् अनुसरन्त एव कलहाः पुरतो दृश्यन्ते। अद्य अत्र को वा कलहः पुरोवर्ती ? (*परिक्रम्य अवलोक्य*) हन्त! प्रियं नः प्रियम्। इतोऽपि कलहः। अमुं संवर्ध्य इतस्ततोऽपि धनमाहरेयम्। (*प्रकाशम्*) आः तपस्विन्याः कुट्टिन्याः पश्यन्त्या एव लङ्कायां सुन्दोपसुन्दाविव युध्यतः। निवार्यताम्। (*इति द्वौ पृथक्कृत्य*) कुतः कलहः, श्राव्यताम्, अहं न्यायवादी निर्णेष्यामि।

दिग :- भद्रपुरुषाः ! न्याय्यं वदन्तु। अहिंसाधर्मपरायणा वयम्।

कौले :- तद्दर्शनमात्रवेद्याः, तर्हि कुतः कलहायसे ?

दिग :- अनेन वराकेण पश्यतो मम च्छागी पीवरजङ्घा मडमडायिता, या च प्राणिषु कारुण्येनैव पालिता। अनेन कुक्षिस्थीकृतापि। (*इति ताडयति*)

कौले :- (*अपवार्य*) मयि स्थिते क्रोधः कुतः ? न्याय्यं विचारयामि।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिग :- तर्हि विचार्यतां शीघ्रम्।

कौले :- (*संग्रामसिंहं प्रति*) किं तथा कृतं त्वया ?

संग्रामः :- (*अंगीकारनंगीकारसूचकं शिरःकम्पनपूर्वकं नेत्रसंकोचं सेङ्गितं धनं दर्शयति*)

कौले :- (*स्वगतम्*) अयं भूरि धनं दित्सति अतः अयमेव जेतव्यः। क्षपणकः किं दास्यति ? अस्थीनि विना। (*सविमर्शं विचार्य, प्रकाशम्*) अनेन च्छागी मारिता इति मौनमेवास्य सूचयति। वदन्ति खलु मौनमर्धांगीकारसूचकम्। परमनेन ज्ञानपूर्वकं छागीवधः कृतः उत न ? (*इति अक्ष्णा इङ्गितं सूचयति*)

संग्राम :- (*सरभसम्*) मया छागीति न निहता। किन्तु गर्दभीति।

कौले :- तर्हि जितमनेन अज्ञानराशिना। विधिशास्त्रे उक्तम्- "अज्ञानेन कृतो दोषः दण्डनार्हो न च क्वचित्"। अतः संग्रामसिंहः न दोषभाक्। (*जनान्तिकं संग्रामसिंह .प्रति*) प्रापय तद्धनं गृहान्, मुक्तोऽसि। गच्छ।

संग्राम :- धन्योऽस्मि। (*स्वगतम्*) अस्मात् राक्षसात् मुक्तोऽस्मि। (*इति पलायते*)

दन्तुरा :- (*रुदन्ती*) अनेन दुष्टेन मम अस्थि भग्नम्। अत्र न्यायनिर्णयं कुर्वन्तु भोः।

कौले :- (*दिगम्बरं प्रति*) किं तथा ?

दिग :- (*अधोमुखः*) अथकिम्, परमज्ञानेन।

दन्तुरा :- किमज्ञानेन ? अनेन दूरात्कवाटमुद्घाटयितुमाकार्य मदुपरि लङ्घितम्।

कौले :- द्वारमुदाघाटयितुमाकारितं त्वया ?

दिग :- अथकिम्, परमिमां नाकारितवान्, तं दुष्टमाहूतवान् ।

कौले :- यदि आकारितवान्, तथा उद्घाटनाय प्रतीक्षा कार्या, तथा न कृतम्, अतः त्वया ज्ञानपूर्वकं कृतः दोषः। "ज्ञानेनैव कृतो दोषः द्विगुणीभूतफलान्वितः। अतः त्वं द्विधा दण्ड्यः।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दन्तुरा :- तद्विधीयतामथ इच्छानुरूपेण।

कौले :- प्रथममस्याः चिकित्सा कार्या। द्वितीया इयं यावज्जीवं तव सहधर्मचारिणी भवति। यतः इयं त्वयैव पङ्गूकृता। वैद्य आहूयताम् ।

दिग :- तथैव वैद्यमाह्वायामि। (*इति गच्छन् स्वगतम्*) इतः पलायेय। को वा भ्रियादिमामां पलितकेशां गलितस्तनीम्। (*इति निष्क्रामति*)

(*अत्रान्तरे मञ्जरी गायन्ती प्रविशति, दन्तुराकौलेयकौ तया सह नृत्यतः*)

मुदिरैर्मेदुरमाकाशं चञ्चलचपलायुक्तं च
पथिक ! नवजलदारावाद्भीता, पथिक ! नवजलदारावाद्भीता ।। 2
मेघच्छन्ने नभोमण्डले सारससरणिं संवीक्ष्य
तडितां वल्लीरालोक्य स्वान्तं चान्याधीनं हि
पथिक ! नवजलदारावाद्भीता ।। 2।।
भेकारावान् केकारावान् पथिकानां किल हाहाकारान्
वालानां खलु वृद्धानां ननु पङ्के पततां श्रावं श्रावं
पथिक ! नवजलदारावाद्भीता।। 2 ।।
पुलकितगात्री सालसनत्री विकलितमनसा नाहं चासे
वल्लीसहितः तरुराजोऽयं विद्युल्लग्नो जीमूतोऽसौ
पथिक ! नवजलदारावाद्भीता ।। 2।।
झुं झुं झुं झुं झंझावाते धिं धिं धिं धिं नृत्यति केकी,
भे भे भे भे हृष्टो भेकः, ढं ढं ढं ढं गर्जति मेघः।
पथिक ! नवजलदारावाद् भीता ।। 2।।

दन्तुरा :- (*मध्ये रुदन्ती*) अहो, कष्टम्, (*पुनः रुदन्ती*) बाधन्ते मां व्रणाः ।

कौले :- (*सक्रोधम्*) शिवपूजायां भल्लूकप्रवेश इव मध्ये दन्तुराकोलहलः (*तां प्रति*) कुत्र ते व्रणाः ? कथं च जाताः ?

दन्तुरा :- (*रुदन्ती*) ह्यः आपणे मत्स्यक्रयणाय गता शुनकेन एकेन दष्टास्मि । ततः जङ्घाव्रणव्याकुलिता भवामि । (*इति दर्शयितुं यतते*)।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कौले :- (*अपवार्य*) मास्तु । दिगम्बरः वैद्यमानेष्यति खलु। स एव सर्वं समीचीनं करिष्यति। वृथा कोलहलं मा कुरु । (*परिक्रम्य अवलोक्य च*) अयं नगरे महावैद्यः जन्तुकेतुः यमराजसोदरः इत एव अभिवर्तते। (*स्वगतम्*) अस्य उपचर्यया दन्तुरा स्वस्था (*स्वर्गस्था*) भविष्यति । ततः कृतकृत्या भवेम।

जन्तुकेतु :-(*प्रविश्य*) व्याधयो मदुपचारलालिताः

मत्प्रयुक्तममृतं विषं भवेत् ।
किं यमेन सरुजां किमौषधैः?
जीवहर्तरि पुरः स्थिते मयि ।।

दन्तुरा :- (सभयम्) आकरेणैव ज्ञायते नूनमयं मामुपरि नेष्यति । (*मञ्जरी हिक्कां करोति*) (*सोद्वेगम्*) जाते ! किमासीत् ! उक्तवती खलु भोजनसमये मत्स्यकण्टकः गले अवरुद्ध इति। भोः वैद्य ! प्रथममस्याः चिकित्सा क्रियताम् । (*रुदन्ती कपटम्*) इयं प्रथमं रक्षणीया, या आवाल्यं प्राणेभ्योऽपि अधिकं पालिता लालिता मया (*इति शिरः आजिघ्रति*)।

जन्तुकेतु :-(*सगर्वम्*) दृष्टप्रत्ययः तावदुपचारः। पूर्वमुष्ट्रस्य गले कर्कटी लग्ना आसीत्। तत्र अस्मत्पित्रा कुटुम्वकेतुना निरक्षरेण स्वैरम् उष्ट्रस्य मुखं बन्धयित्त्वा दृढ़तरं रज्जुभिराकृष्टम् । ततः तन्मुखाद्विगलिता कर्कटी । तदेवमेतस्या अपि मुखं बन्धयित्वा कुतो नाकृष्यते ? (*ततः हसन्त्या मञ्जर्याः हिक्का दूरीभवति, ततः निष्क्रामति*) भोः, अवधार्यतामस्म - दुपचारचातुर्यम्।

कौले :- जन्तुकेतो ! महाप्रयत्नेन क्रियतामस्या उपचारः ।

जन्तु :- अस्मदनुष्ठितायाः अस्याः औषधोपचारः विशेषतः मर्मभेदी भवति ।

कौलेः- निवेद्यतां तदुपचारः ।

जन्तु :- श्रूयतां चरकमतम् -

"यस्य कस्य तरोर्मूलं येन केनापि पेषयेत् ।
यस्मै कस्मै प्रदातव्यं, यद्वा तद्वा भविष्यति ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कौले :- अद्येह हट्टे रोदनकलकलः संवृत्तः । तत्र किं भवदुपचारः संजातः ?

जन्तु :- नहि, नहि ! भवद्भिरेव तत्र स्वस्त्ययनं कृतं स्यात् ।

कौले :- (*ससंभ्रमं*) नहि, नहि । सद्यः क्रियतामस्याः उपचारः ।

जन्तु :- (*सूच्यां किमपि औषधं पूरयन्*) दन्तुरे देहि मे बाहुम्।

दन्तुरा :- (*बाहुं प्रदाय नेत्रे तिर्यक् आकुञ्च्य सूचीवेधनपीडां नाटयन्ती*) अहो कष्टं, कष्टम् । पतितास्मि । (*इति शेते।*)

जन्तु :- भोः, अस्तु, अस्याः पीडा शाम्यतु । ततः उत्थास्यतीयं, चिन्ता मास्तु। अहो, दुर्दैवमस्माकम् । निर्व्याधयः सकलनगरवासिनः। (*दीर्घं निश्वस्य*) मन्ये, भवतां प्राड्विवाकानामपि जीविका कठिना इति । यतः कयापि समस्यया न्यायालयं गच्छन्तः जनाः आधिव्याधिग्रस्ताः भूरिशः अहमहमिकया चिकित्सार्थमायान्ति स्म। अद्य कोऽपि न दृश्यते।

कौले :- अयि, एकस्य चिकित्सा कियद्दिनं क्रियते भवता ?

जन्तु :- भोः, किं न श्रुतम्, अष्टांगहृदये महावैद्यलक्षणम् ?

श्मश्रुसंचयविध्वंसि ज्वलज्ज्वलनभाजनम् ।
नोपसर्पति चेद्गौर्मृतं मुञ्चति किं भिषक् ?।।

भवता कियता कालेन अभियुक्तः त्यज्यते ?

कौले :- अभियुक्तस्य घटश्राद्धं यावत् स न त्याज्यः, इति अस्माकं प्रथमः कुलाचारः। अपरः धनकारिव्यवहारः यावता न लब्धः, पूर्वो व्यवहारः जटिलतमः कार्यः, इति द्वितीयः ।

जन्तु :- (*सहर्षम्*) सत्यमुक्तम्, अत एव किल न्यायवादः, भैषजयं साम्यं भजतः । उभयत्रापि इदमपि साम्यम् यत् –

"परापकारशून्यो यः क्षणार्धमपि तिष्ठति ।
स लोहकारभस्त्रेव श्वसन्नपि नं जीवति ।"

दन्तुरा :- (*उत्थाय दिग्भ्रमं नाटयन्ती*) महावैद्य, तिमिराकुले मे नयने न पश्यतः । तदौषधं भण।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जन्तु :- चक्षुरोगे समुत्पन्ने ताम्रकल्लं गले न्यसेत्।
तदा नेत्रोद्भवां पीड़ां मनसापि न संस्मरेत्।।
अपि च – अर्कक्षीरं वटक्षीरं स्नुहीक्षीरं तथैव च।
अञ्जनं तिलमात्रेण पर्वतोऽपि न दृश्यते ।।
(*इति नेत्रयोः किमपि रसं निक्षिपति*) दन्तुरे ! कियद्दूरं पश्यसि ?

दन्तुरा :- मूर्ख, वैद्य ! किं दत्तवान् नेत्रयोः। नेत्रे ज्वलतः। (*ततः नेत्रे सम्मार्ज्य कथमपि उत्थाय सम्मार्जन्या वैद्यं सवेगं ताडयन्ती*) महावैद्य ! कियद्दूरं पश्यसि ?

वैद्य :- वटवृक्षं यावत्। (*दन्तुरा पुनः ताडयति वैद्यः पलायते*)

कौले :- वैद्य एव तिमिराकुलः। पलायितवान् मूर्खः। (*सर्वे निष्कान्ताः*)

(*जवनिका पतति*)

द्वितीयः अंकः

(*उद्यानवनम्, सायं समयः*)

कौले :- (*प्रविश्य*) सायं समये अत्र मञ्जरीम् आगन्तुं संकेतो दत्तः। वहुविलम्वो भवति । (*इतस्ततः परिक्रम्य*) कुतो नायाता, भवतु अत्रैव शिलापट्टे उपविश्य तां प्रतीक्षिष्ये। (*इति उपविशति*)।

मञ्जरी :- (*गायन्ती नृत्यति*)
रिम् झिं रिं झिं सीकरधारा
प्रियतमभुजयुगसमालिङ्गनम्
किं वदनीयं निरुपमभाग्यं मे ।।2।।
आसारैरिह कासारोऽयं मुदा पूरितो मानससहितः
नवजलपतनाद्गन्धमादिका मृदा मोदितं मदनमन्दिरम् ।।
किं वदनीयं निरुपमभाग्यं मे।।
नवघनजीवनकणिकाः पातुं चातकसंघश्चिराद्वांछति

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri
नववरप्रियतमभुजावल्लरीवन्धनमागिरसति हृदयम्।

किं वदनीयं निरुपमभाग्यं मे।।

कौले :- (*परिलक्ष्य*) ननु मञ्जरी प्रत्यायांतैव। (*समीपमेत्य*) अयि कुतो विलम्वः ?

मञ्जरी :- किं वक्तव्यम् ? आपणम्, उद्यानं, मन्दिरं वा यत्र कुत्र गच्छामि तत्र तत्र अहमपि आयामीति सदा पीडयतीयं दन्तुरा। किं वक्तव्यम् ? वृद्धा, इयं वहुसमस्याकरीभवति। अद्यापि प्रस्थातुकामां माम् अनुगच्छन्ती विलम्वहेतुर्जाता। कदा वा अस्याः मुक्तिः लप्स्यते ?

कौले :- अत एव इयं वार्धके दिगम्वरेण ध्रियेत इति निर्णयः कृतः। सोऽपि दुरात्मा तत एव पलायितः।

मञ्जरी :- नूनं गृहीतो भविष्यति भवता। तव असाध्यं किमस्ति ?

कौले :- ततः किमन्यत् ? स कुत्रापि भवेत् ग्रहीष्यते।

मञ्जरी :- (*आलस्यं नाटयन्ती*) अतीव श्रान्तास्मि। अस्मिन्नेव लतानिकुञ्जे किञ्चिद्विश्राम्याव। (*इति निष्क्रान्तौ, ततः प्रविशति कुक्कुटभूषणः*)

कुक्कुटभूषण :-

(*सगर्वम्*) गुरोर्गिरः पञ्चदिनान्यधीत्य वेदान्तशास्त्राणि दिनत्रयं च।

वयं समाघ्रातवितर्कवादाः समागताः कुक्कुटभूषणार्याः।।

आप्रातः आयकारि किमपि कार्यं न लब्धम्। प्रातः कस्य वा मुखं दृष्टम्? प्रस्थानसमये का वा शकुनरुपेण प्रत्यागता गर्दभी ?(*इति प्रक्रम्य अवलोक्य*) चिराय कोऽपि यजमानः समागच्छति। अस्मात् मुद्रिका नूनमाहरणीयाः।

दिग :- (*प्रविश्य*) भोः भोः कुक्कुटार्याः, अभिवादये।

कुक्कुट :- (*उच्चैः*) दीर्घायुर्भूयाः। (*उपसृत्य, दीर्घं निःश्वस्य स्वगतम्*) अरे, अयं क्षपणकः। किमनेन सेत्स्यति ? (*दक्षिणाक्षिस्पन्दं नाटयित्वा*) दक्षिणाक्षिस्पन्देन धनलाभो भूयान् भवतीति शास्त्रसम्मतम्। अस्तु भाग्येऽनुकूले मरुस्थलेऽपि पुष्पवृष्टिः। वन्ध्यायाः गर्दभ्या अपि क्षीरोत्पत्तिः खलु। (*प्रकाशम्*) भदन्त, अपि कुशलम् ?

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिग :- युष्मत्प्रसादात्, चिराय भवता सह शास्त्रचर्चा न जाता, अधुना कस्मिन् शास्त्रे चर्चा क्रियते, श्रोतव्यमिति कुतूहलम् ।

कुक्कुट :- अधिगतसकलशास्त्रः, विशेषतः धर्ममोक्षमीमांसयोः कृतभूरिपरिश्रमः। अत एव मम शाकमांसाहारतस्य कुक्कुटस्य उभयचर्वणासाम्यात् मां कुक्कुटभूषण इति व्यपदिष्टवन्तः गुरवः।

दिग :- भद्र ! "चो... नोदनालक्षणार्थो धर्मः" इति सूत्रं व्याख्यातं पूर्वम्। अधुना वेदान्तवादिनां भवतां प्रामणिकमद्वैतं प्रमाणिकं वा ? प्रमाणमिति चेत् द्वैतापत्तिः। अथ प्रमाणं नास्ति चेत् कथमद्वैतोपलाब्धिः ?

कुक्कुट :- (*वाक्स्खलनपूर्वकम्*) अ... स्त्ये... व प्रमाणम्। किन्तु... अभिन्नम्। तदेव प्रमाणं तदेव प्रमेयमिति गम्भीरा चर्चा।

दन्तु :- (*ससंभ्रमं प्रविश्य*) कुत्र सः ? मदीयः प्रियतमः, पलायितः (*इतस्ततः परिक्रम्य संलक्ष्य दिगम्बरकरं गृह्णाति*) अयि, कुत्र गतोऽसि ? निष्करूण !

कुक्कुट :- शान्तं पापम्, शान्तं पापम्, प्रतिहतममङ्गलम्। आश्रमविरुद्धं स्त्रीस्पर्शनं, प्रायश्चित्तं विधेयम्। भ्रष्टस्य का वा गतिः ?

दिग :- ब्राह्मण्यं विनापि परमः प्रतिष्ठाप्रकर्षः। (*इति समीपमायाति*)

कुक्कुट :- अरे रे भिक्षुक, दूरं गच्छ । विसदृशजातिस्पर्शदूषितोऽसि ।

दिग :- धिङ्मूर्ख ! जातिरेव नास्ति। तथा च सुगतमतानुगं वचः। यथा -

एतासु पञ्चस्ववभासिनीषु प्रत्येकबोधस्फुटमण्डलीषु।
साधारणं षष्ठमिहेक्षते यः शृङ्गं शिरस्यात्मन ईक्षते सः।।

किंच, अस्मन्मते भावाः सर्वे क्षणिकाः। नह्यात्मा स्थायी । तर्हि कुतः स्त्रीस्पर्शदूषणम् ?

कुक्कुट :- तत्किं दत्तो दोषः उपपन्नोऽस्ति न वा ?

दिग :- विनाशशीला भावा जायन्ते ?

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुक्कुट :- अरे भिक्षुक, उत्पत्तिक्षणः विनाशक्षण इति परस्परविरुद्धम्। तद्भिन्नः उत्पत्तिक्षणः, भिन्नः विनाशक्षण इति।

दिग :- (*शनैः शनैः समीपमेत्य स्पृशति, ततः उभयोःमहान् कलहः केशाकेशि जातः। ततः दिगम्बरेण गलहस्तं निस्सारितः कुक्कुटभूषणः)*

कुक्कुट :- (*रूदन्*) अवश्यं तव प्रतीकारः क्रियते।

कौले :- (*प्रविश्य स्वागतम्*) 'वाक्कीलमनुगच्छन्ति कलहाः सर्व एवहि" इति वचनं मम विषये सम्यक् समन्वितम् । अधुना अस्मिन् कलहे इतस्ततः अपि धनमाहरेयम् । (*उपसृत्य संलक्ष्य च*) अयं स एव वराकः । अनुरूपं वरं लब्धवती इयं दन्तुरा।

दिग :- उभयतः स्पाशा रज्जुः । (*इति पलायते*)

कौले :- (*तं गृहीत्वा*) अरे कुत्र गच्छसि, तपस्विनीमिमां विहाय ?

दिग :- (*स्वगतम्*) यौवनादेव मञ्जरीमानसः अस्मि । सा तु दुर्लभैव । इयं तस्याः माता । "आत्मा वा पुत्रनामा" इति श्रुत्या मातापुत्र्योः ऐक्यम्। अतः अस्या लाभेन मञ्जरीप्राप्तिसन्तुष्टान्तरंगोऽस्मि । (*प्रकाशम्*) यद् भवते रोचते।

कौले :- (*दन्तुरां प्रति*) आयि। त्वद्गुणाकृष्टोऽयं तपस्वी। त्वं चाद्यापि नवनवतिवर्षदेशीया युवतिः। तदनुष्ठीयतां तुल्यो युवयोर्विवाहः।

दन्तुरा :- (*सलज्जम्*) यद्युष्माकं सम्मतं भवति।

कौले :- तद्विवाहाय समाहूयतां कुक्कुटभूषणः।

कुक्कुट :- आर्य, अयमस्मि । (*स्वगतम्*) अनेन विवाहेन वृद्धगलो भवति मूर्खः।

दिग :- (*सलज्जम्*) आर्य, युष्मच्चरणयुगलं प्रणमामि ।

कुक्कुट :- क्षपणक, दोपाकरमुखीमेनां दन्तुरां प्राप्य चण्डिकाम् ।
भज त्वं शूलिनः कान्तिं श्मशानाश्रमवासिनः।।

कौले :- कुक्कुटार्यैः मुहूर्तो निर्णीयताम्।

कुक्कुट :- अद्यैव अपराह्णे चण्डमुहूर्ते ज्येष्टानक्षत्रे शनैश्चराधिष्ठिते धनुषि लग्ने युक्तः स्यादनयोर्विवाहमुहूर्तः।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कौले :- तत्रैव वैधव्यं ध्रुवम् ।

कुक्कुट :- तारया अस्या अग्रभागे वैधव्यं, तदा को दोषः ?

कौले :- साधूक्तम्, भवतु, अत्रैव उद्यानमण्डपे त्वरया विवाहः क्रियताम् ।

कुक्कुट :- (*दिगम्बरमर्कपुष्पैरलंकृत्य*) तदुपसर्पतु तावदेनां वरवेषधारी करग्रहणाय दिगम्बरः ।

1459
महर्षि-पाणिनि-प्रज्ञा-अनुसन्धान
तिथी.......
पु०सं०.......
भारती पुस्तकालय

कुक्कुट :- (*स्वस्त्ययनार्थं पुष्पाक्षतान्यादय*)
जातस्य हि ध्रुवं मृत्युः ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्यार्थे न त्वं शोचितुमर्हसि ।।

(*दिगम्बरः दन्तुराकरग्रहणं कृत्वा उपसर्पति*)

कौले :- अस्मत्कुलमर्यादानुरूपं ग्रामसिंहसहस्रं (*कुक्कुरसहस्रं*) नगरस्य, कन्यादानसन्दर्भे ऽस्मिन् दक्षिणार्थं सुगन्धताम्बूलार्थं च दीयते ।

कुक्कुट :- भोः कौलेयक, यावदाभ्यां लीलागारे शयनसौख्यं न लभ्यते, तावत्कुतो कौतुककौतुकम् ?

कौले :- एतयोरत्र कौतुकागारे महाशय्या क्रियताम् । यो यत्र म्रियते तत्रैव तस्य दाहो युक्तः ।

कुक्कुट :- अस्मिन् विवाहसंदर्भे अनयोः पुरातनयोः दम्पत्योः सर्वथा रोगसमृद्धिरस्तु । श्वासकासविसर्पादिसर्वसंपदस्तु । प्रदीयतां मे वैवाहिकी दक्षिणा । (*दिगम्बरः हरीतकीयुगलमुपनयति । सरोषम्*) अरे रे निर्लज्ज, दुराचार, नग्नक, लुञ्चितकेश ! दिगम्बर ! दक्षिणाप्रलोपः कृतस्त्वया । तदेनामादाय यास्यामि । (*इति दन्तुरया निष्क्रामति*)

(*जवनिका पतति*)

इति शम्

*

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

महर्षि-पाणिनि-प्रज्ञा-अनुसन्धान
तिथी........
पु०सं०........
भारती पुस्तकालय
1459

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मिन् संग्रहे रू

प्रथमः प्रकाशः

1. नरविक्रयम्
2. प्रेमरेखा
3. वञ्चकपञ्चकम्

द्वितीयः प्रकाशः

4. बधिरचतुष्टयम्
5. कन्याशुल्कम्
6. वैद्यवाचस्पत्यम्

तृतीयः प्रकाशः

7. सोऽयं देवदत्तः
8. ते हि नो दिवसा गताः
9. प्रदरधनञ्जयम्

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.